# 6 रमणीया नगरी



गान्धीनगरं गूर्जरराज्यस्य राजधानी अस्ति। इदं सुन्दरं, सुयोजितं च नगरम् अस्ति। अत्र बहूनि दर्शनीयानि स्थानानि सन्ति। यथा सचिवालयः, महात्मामन्दिरम्, अक्षरधाममन्दिरम् एवं इन्द्रोडा पक्षि उद्यानम्।



इदं सचिवालयभवनम् अस्ति। अस्मिन् भवने विधानसभायाः अधिवेशनानि भवन्ति। अस्मिन्नेव भवने स्थित्वा राज्यस्य मन्त्रिणः, सचिवाः अन्ये च अधिकारिणः राज्यकार्यं सञ्चालयन्ति। सचिवालयः एव गूर्जरप्रदेश-शासनस्य मुख्यः कार्यालयः अस्ति।



अस्माकं राष्ट्रपितुः श्रीमात्म गान्धिमहोदयस्य स्मृतिरूपेण एतस्य मन्दिरस्य निर्माणम् अभवत्। यत् 'महात्मामन्दिर नाम्ना प्रसिद्धम्अस्ति' महात्मा गान्धिमहोदयः भारतस्य स्वतन्त्रतायाः कृते भृशं प्रयत्नम् अकरोत्। एतानि सर्वाणि कार्याणि चित्ररूपैः अत्र प्रदर्शनार्थं प्रस्तुतानि सन्ति।



एतत् 'अक्षरधाम' नामकं विशालं मन्दिरम् अस्ति। मन्दिरे प्रदर्शनविभागः अतीव मनोहरः अस्ति। प्रदर्शनविभागे जनाः एकं चलचित्रम् अपि पश्यन्ति। अध्यात्मविज्ञानयोः सङ्गमः अत्र दृश्यते। अत्र चित्ताकर्षकं विशालम् उद्यानम् अपि अस्ति। प्रतिदिनं बहवः यात्रिकाः एतस्य मन्दिरस्य दर्शनार्थम् आगच्छन्ति।



गान्धीनगरस्य समीपे एव विशालं इन्द्रोडा पक्षिउद्यानम् अस्ति। एतस्मिन् स्थाने खगाः, प्राणिनः च निजपर्यावरणे एव निवसन्ति। डायनोसोर नाम्नः प्राचीनमहाकायप्राणिनः विशेषः विभागः अस्ति। एषः विभागः बालानां कृते अतीव आकर्षकः मनोरञ्जकः च अस्ति। अत्र एकं सर्पगृहम् अपि अस्ति। विविधकुलानां सर्पान् अत्र द्रष्टुं शक्नुमः।



गान्धिमन्दिरतः नातिदूरे एव विद्याभवनं नाम विशालं भवनम् अस्ति। तत् एव भवन जी.सी.ई.आर.टी. रूपेण ख्यातम् अस्ति। विद्याभवने जी.सी.ई.आर.टी. नाम परिषदः कार्यालयः अस्ति। इयं परिषद् अस्माकं प्राथमिक शिक्षणक्षेत्रे परिवर्तनार्थं सततं प्रवृत्ता अस्ति

गान्धीनगरे विशालाः स्वच्छमार्गाः च वर्तन्ते। एतस्मिन् नगरे बहूनि रमणीयानि उद्यानानि सन्ति। नगरे बहवः पादपाः सन्ति तेन कारणेन इदं नगरं विश्वस्य हरितनगरं रूपेण अपि प्रसिद्धम्।

## टिप्पणी

**इदम्** આ **बहूनि** ઘણાં **अस्मिन्** એમાં **कृते** માટેની **भृशम्** ખૂબ જ **निवसन्ति** રહે છે. **कुलानाम** કુળોના **द्रष्टुम्** જોવા માટે **नातिदूरे** વધારે દૂર નહિ નજીક **ख्यातम्** જાણીતું

## स्वाध्यायः

**1. નીચે આપેલા શબ્દો શુદ્ધ ઉચ્ચાર સાથે મોટેથી બોલો :**

गूर्जरराज्यस्य, दर्शनीयानि, इन्द्रोडा, पक्षि-उद्यानम्, अस्मिन्, स्थित्वा, सञ्चालयन्ति, स्मृतिः, स्वतन्त्रतायाः, भृशम्, प्रदर्शनार्थम्, चित्ताकर्षकम्।

**2. નીચેના પ્રશ્નોના જવાબ આપો :**

(1) गूर्जरराज्यस्य राजधानी किम् नगरम् अस्ति ?

(2) महात्मामन्दिरतः नाति दूरे एव किम् अस्ति ?

(3) पक्षि-उद्याने किं किम् अस्ति ?

(4) अध्यात्मविज्ञानयोः सङ्गमः कुत्र दृश्यते ?

(5) स्वतन्त्रतायाः कृते कः भृशं प्रयत्नम् अकरोत् ?

**3. જોડકાં જોડો :**

| अ | | आ |
|---|---|---|
| (1) गान्धिनगरम् | ☐ | (1) जी.सी.ई.आर.टी. |
| (2) अक्षरधाममन्दिरम् | ☐ | (2) अस्माकं राष्ट्रपिता |
| (3) इन्द्रोडा पक्षि-उद्यानम् | ☐ | (3) अस्माकं राष्ट्रपितुः स्मृतिः |
| (4) विद्याभवनम् | ☐ | (4) विविधकुलानां सर्पाः |
| (5) महात्मामन्दिरम् | ☐ | (5) हरितनगरम् |
| | | (6) चलचित्रं पश्यन्ति |

**4. નીચે ઉદાહરણમાં દર્શાવ્યા પ્રમાણે કૌંસમાં આપેલા શબ્દોનો ઉપયોગ કરી વાક્યો લખો :**

(मन्दिरम्, पक्षिगृहम्, उद्यानम्, तडागः)

ઉદાહરણ : मम ग्रामे विद्यालयः अस्ति।

(1) ______________________________

(2) ______________________________

(3) ______________________________

(4) ______________________________

**5. નીચે આપેલાં વાક્યોને સંસ્કૃતમાં લખો :**

(1) મારું ગામ સુંદર છે.

(2) અહીં ઘણાં બધાં પક્ષીઓ છે.

(3) મારા ગામમાં બગીચો છે.

(4) મારી શાળા મોટી છે.

(5) ગાંધીજી આપણા રાષ્ટ્રપિતા છે.

**6. આપેલા વિકલ્પોમાંથી યોગ્ય વિકલ્પ પસંદ કરી ખાલી જગ્યા પૂરો :**

(1) अत्र पाठशाला अस्ति। पाठशालायां ______________ सन्ति। (छात्राः, खगाः)

(2) अत्र शिक्षकखण्डः अस्ति। शिक्षकखण्डे ______________ सन्ति। (बालाः, शिक्षकाः)

(3) अत्र पुस्तकालयः अस्ति। पुस्तकालये ______________ सन्ति। (पुस्तकानि, बालिकाः)

7. તમારા ગામ/નગરનું વર્ણન સંસ્કૃતમાં પાંચથી છ વાક્યોમાં કરો.

**પ્રવૃત્તિ :**

- તમારા ગામનું/વિસ્તારનું ચિત્ર બનાવો.
- પુસ્તકાલયમાંથી ગુજરાતની રાજધાની વિશે વધુ માહિતી પ્રાપ્ત કરો.
- તમારા વિસ્તારની નજીકનાં જોવાલાયક, ફરવાલાયક સ્થળોની વિગત મેળવો.